# अधिकारसूत्रस्वरूपम्

**प्रकाशतिवारी (विद्यावारिधिः)**

*सहप्राध्यापकः, नेपालसंस्कृतविश्वविद्यालयः, वाल्मीकिविद्यापीठम्*

p85tiwari@gmail.com

Orcid: https://orcid.org/0009-0004-8507-7548

https://doi.org/10.3126/anveshana.v4i1.96919

**लेखसारः**

*वैयाकरणाः सर्वदैवाल्पक्षरव्यवहारेण व्यापकमर्थं प्रकाशयितुमिच्छन्ति। व्याकरणशास्त्रे सूत्रेष्वदृष्टम्पदं सूत्रान्तराद् सर्वत्रैवानुवर्तनीयं भवति। अनुवृत्तिकौशलमधिकारसूत्रञ्च वैयाकरणानामेतादृशीमिच्छां पूरयति। अत्रानुसन्धाने को नामाधिकारः, स्वरितेनाधिकारसूत्रस्याशयः, किं नामस्वरितम्, अधिकारसूत्रलक्षणम्, व्याकरणशास्त्रे-ऽनुवृत्तिव्यवस्था, अधिकारस्यानुवृत्तिः, अधिकारसूत्रस्य प्रयोजनमित्यादयो विषया यथासम्भवं सुस्पष्टीकृताः सन्ति। तत्र क्रमेऽधिकारसूत्रस्य स्वरूपविषयेऽनुसन्धानं विहितम्। ततः सभेदमधिकारपदस्य विवेचनं प्रदर्शितमस्ति। यथासम्भव गुणात्मकविधिरङ्गीक्रयतेऽत्रानुसन्धानक्रमे। अधिकारसूत्राणां विश्लेषणक्रमे सम्बद्धसूत्रार्थ–वृत्ति–वार्तिक–फक्किका–परिभाषेत्यादीनां सम्यग्परिशीलनं विहितम्। संस्कृतव्याकरणपरम्परायां सञ्ज्ञापरिभाषाविधिनियमातिदेशाधिकाराश्चेति षड्विधानि सूत्राणि समुपलभ्यन्ते। संज्ञासंज्ञिप्रत्यायिका संज्ञा, अनियमे नियमकारिणीति परिभाषा, आदेशादिविधायको विधिः, प्राप्तस्य विधेर्नियामको वा सिद्धे सत्यारभ्यमाणो विधिर्नियमः, अन्यतुल्यत्वविधानमतिदेशः, एकत्र उपात्तस्यान्यत्र व्यापारोऽधिकारसूत्रं कथ्यते। तेष्वधिकारसूत्रस्य प्रयोजनं विशिष्टमस्त्येव। परन्त्वधिकारसूत्रस्य स्वरूपविषये विदुषां मतवैभिन्न्यं प्राप्यन्ते। त्रय प्रकारकाः चतुर्विधप्रकारका वाऽधिकारसूत्राणि भवन्तीति विषये च वैमत्यम्। कतिपय वैयाकरणा अधिकारस्य चतुर्विधस्वरूपं वर्णयन्ति– गोयूथः, सिंहदृष्टिः, मण्डुकप्लुतिः, गङ्गास्रोतःप्रवाहश्चेति। कस्यचिच्छब्दस्य कतिपयसूत्रपर्यन्तमनुवृत्तिर्गोयूथः। सिंहदृष्टिवदग्रे पठितस्य सूत्रस्य कतिपयशब्दानां पृष्ठतोऽनुवृत्तिः सिंहावलोकिताख्या, तदपेक्षयाऽधिकसङ्ख्यकसूत्रानुवृत्तिर्गङ्गास्रोतश्शब्दवाच्या। अधिकारसूत्रस्वरूपविमर्शे प्रथमं कस्य सूत्रस्य किं सूत्रं यावदधिकारः कस्य कथञ्चोपयोगः, उदाहरणानि च कानि चेत्यादिजिज्ञासाशान्त्यै अधिकारसूत्रनिरूपणेन तेषां प्रयोगविवरणं यथासम्भवमुदाहरणप्रदर्शनेन प्रकाशयितुं शक्यते परन्त्वत्र लेख। अतोऽत्रानुसन्धाने जिज्ञासुपाठकानां छात्राणाञ्च सुखबोधायात्राधिकारसूत्रस्वरूपं सरलतया सोपपत्तिकञ्च विश्लेषणं विहितमस्ति।*

**शब्दाकुञ्जी** – अनुवृत्तिः, गङ्गास्रोतःप्रवाहः, गोयूथः, मण्डुकप्लुतिः, सिंहदृष्टिः।

## विषयपरिचयः

महर्षिपाणिनिप्रणीताष्टाध्यायीग्रन्थः संस्कृतव्याकरणग्रन्थेषु सर्वाग्रगण्यः सर्वाधिकविज्ञानात्मकः लोकप्रियश्चास्तीति प्रथित एव विषयः। अष्टाध्याय्यां परिकल्पिताः नियमव्यवस्था, अनुवृत्तिव्यवस्था, अपवादव्यवस्था, षड्विधसूत्राणां व्यवस्था, गणसूत्राणां परिकल्पना, प्रत्याहारव्यवस्था, अन्यानि भाषावैज्ञानिकतत्त्वानि च अपूर्वाणि, गभीराणि, अत्युन्नतबुद्धेरवस्थायाः रूपेण च स्थितानि वर्तन्ते। पाणिनीयतन्त्रे सञ्ज्ञापरिभाषाविधि-नियमातिदेशाधिकाराश्चेति षड्विधानि सूत्राणि समुपलभ्यन्ते। तेष्वधिकारसूत्रस्य लक्षणं भवत्युत्तरोत्तरगमनम्। अधिकरोतीत्यनेन पाणिनीयसूत्रसम्बन्धे केनाऽपि सूत्रेण विहितं कार्यं किं सूत्रं यावत् प्रचलतीति विवेचनसम्बद्धं सन्दर्भं स्मारयति। यदा किञ्चनं कार्यं तस्य च निमित्तानि सङ्क्षेपेणोक्त्वाऽऽगामिसूत्राणां प्रकाशनं क्रियते, तदा तदधिकारसूत्रमिति निर्दिश्यते। सामान्यतः सूत्राणां स्वरूपं तत्र विहितानां पदानां प्रकाशनेन वैयाकरणैः प्रदर्श्यते। एकपदमिदं द्विपदमिदं त्रिपदमिदमित्यादि प्रकारेण सूत्रस्थपदानां विवरणं प्रदर्श्य वैयाकरणैः सूत्रस्वरूपनिरूपणं क्रियते। अष्टाध्याय्यां सूत्रेषु निष्णातेन पाणिनिना विन्यस्ताः, अधिकाराः तेषां कार्यक्षेत्रनिश्चयहेतुतया, पुनःपुनः पठनावश्यकतानिवृत्त्याञ्च, ग्रन्थलाघवकारणतया च विनियोजिताः। एष्वधिकारेषु कतिपयेषु स्थानेषु काचित् विचित्रावस्था दृश्यते—यत्र कस्यचिदधिकारस्य समापनात्पूर्वमेवान्यस्याधिकारस्यारम्भः क्रियते, येन पूर्वाधिकारस्य प्रयोजनमप्रायशः निष्फलत्वं प्राप्नोति। एषा स्थितिस्तेन प्रकारेण यथा कोऽपि शासनाधिकारी स्वपदत्यागात्पूर्वमेवान्येन प्रतिस्थाप्यते न तथैव सूत्राधिकारविन्यासे पाणिनिना यथासम्भवमाचरितमिति मतम्। तथापि दृश्यते यत्, कश्चन पूर्वाधिकारः केवलं परं सूत्रमात्रं न व्याप्नोति, अपि तु दूरवर्ती सूत्रपर्यन्तं प्रवृत्तिं प्राप्नोति। अस्य पाणिनिनः सूक्ष्माभिप्रायः कः ? इति प्रश्नस्य किञ्चित् समाधानं महाभाष्ये लभ्यते। अत्रानुसन्धाने तद्भाष्यव्याख्यानमधिकृत्य तस्यैव विमर्शस्य विकासरूपेण प्रवर्तते। अतोऽष्टाध्यायीस्थाधिकारसूत्राणां स्वरूपमन्वेषणं संस्कृतव्याकरणक्षेत्रे महत्त्वपूर्णकार्यमिति निश्चित्य अधिकारसूत्रस्वरूपविवेचनम् इति शीर्षकं निर्धार्यानुसन्धानमिदं प्रारब्धम्।

## समस्याकथनम्

अनुसन्धानेऽस्मिन् निम्नाङ्किताः समस्याः समुपस्थापिताः सन्ति —

(क) किं नाम अधिकारसूत्रम् **?**

(ख) अधिकारसूत्रस्वरूपं किम् ?

## उद्देश्यकथनम्

अस्मिन्नध्ययने पूर्वोक्तसमस्यासमाधानार्थमित्थं बिन्दुगतरूपेणोद्देश्यानि निर्धारितानि सन्ति —

(क) अधिकारसूत्रस्य परिचयप्रदानम्।

(ख) सभेदमधिकारसूत्रस्वरूपविवेचनम्।

## पूर्वकार्यसमीक्षा शोधान्तरालञ्च

*पाणिनीयाष्टाध्याय्यां प्रयुक्तानां सञ्ज्ञाविधायकसूत्राणां परिशीलनम्* इति शीर्षके इतः पूर्वं मयाऽध्ययनं कृतम्। तत्र पाणिनीयाष्टाध्याय्यां प्रयुक्तानां संज्ञाविधायकसूत्राणां परिशीलनक्रमे अष्टषष्टीसङ्ख्याकानां संज्ञानां चर्चा विहिता। तथैव संज्ञाविधायकसूत्राणामर्थविवेचनपूर्वकं तेषामुदाहरणानि च प्रदर्शितानि सन्ति। तथैव *अष्टाध्यायीस्थपारिभाषिकसूत्राणां परिशीलनम्* इति शीर्षकेऽपि मया पाणिनीयाष्टाध्याय्यां प्रयुक्तानां परिभाषाविधायकसूत्राणां परिशीलनक्रमे चतुर्विंशतिसङ्ख्याकानां परिभाषासूत्राणां चर्चा विहिता। तत्र तेषामर्थविवेचनपूर्वकमुदाहरणानि च प्रदर्शितानि सन्ति। तथैव *पाणिनीयाष्टाध्यायीस्थाधिकारसूत्राणां प्रयोजनम्* इति शीर्षके नेपालस्थं विश्वविद्यालयानुदानाऽऽयोगे लघ्वनुसन्धानप्रबन्धं रचितम्। विश्वविद्यालयानुदानाऽऽयोगस्य नियमानुसारेणाऽनुसन्धानप्रबन्धस्याऽऽधारेऽनुसन्धानात्मकलेखस्य प्रकाशनमावश्यकं भवति।

## अध्ययनविधिः

अस्मिन्ननुसन्धानेऽवलम्बितोऽध्ययनविधिर्यथा-

### अनुसन्धानप्रकारः

गुणात्मकप्रकारकमध्ययनमिदम्। अत्र हि पाणिनीयतन्त्रे सञ्ज्ञापरिभाषाविधिनियमातिदेशाधिकाराश्चेति षड्विधानि सूत्राणि समुपलभ्यन्ते। संज्ञासंज्ञिप्रत्यायिका संज्ञा, अनियमे नियमकारिणीति परिभाषा, आदेशादिविधायको विधिः, प्राप्तस्य विधेर्नियामको वा सिद्धे सत्यारभ्यमाणो विधिर्नियमः, अन्यतुल्यत्वविधानमतिदेशः, एकत्र उपात्तस्यान्यत्र व्यापारोऽधिकारसूत्रं कथ्यते। तेष्वधिकारसूत्राणामेवाध्ययनं कृत्वाऽधिकारसूत्रस्य स्वरूपविषये निष्कर्षः स्थापितोऽस्ति।

### क्षेत्रं सीमा च

पाणिनीयाष्टाध्यायीस्थाधिकारसूत्राणामध्ययनमस्यानुसन्धानस्य विषयक्षेत्रमस्ति। तत्र क्रमेऽष्टाध्याय्यां सम्पूर्णस्यापि सूत्रस्य सूत्रान्तरेषु वा योऽधिकारः, प्राप्यते तादृशस्यैवाधिकारस्य विमर्शोऽस्यानुसन्धानकार्यस्य क्षेत्रमस्ति। एकस्मिँल्लघुलेखे सञ्ज्ञापरिभाषाविधिनियमातिदेशाधिकाराश्चेति षड्विधसूत्राणां विश्लेषणं स्वरूप-प्रदर्शनञ्चासम्भवमिति निश्चित्याधिकारसूत्राणामेव स्वरूपविवेचनमस्यानुसन्धानकार्यस्य सीमा वर्तते।

### तथ्यसङ्कलनं तत्साधनानि च

अत्राध्ययने पाणिनिमुनिप्रणीतस्याष्टाध्यायीग्रन्थाद् सामग्रीसङ्कलनं विहितमस्ति। अतः प्राथमिकस्रोतस एव तथ्यसङ्कलनसाधनमस्तीति विज्ञापयामि।

**सामग्रीसङ्कलनविधिः**

अनुसन्धानसामग्रीसङ्कलनविधौ प्रचलितानां विधीनामत्र समुपयोगः कृतो वर्तते। तेषु निगमनागमन-व्याख्यानात्मकगुणत्मकविधयः प्रयुक्ताः सन्ति। प्रधानतयाऽत्राधिकारसूत्रलक्षणपरिशीलनक्रमे गुणात्मकविधिः प्रयुक्तोऽस्ति। तथैव प्रामुख्येन पुस्तकालयविधिरेवात्र सामग्रीसङ्कलने प्रयुक्तः।

**सामग्री-विश्लेषणप्रक्रिया**

अत्राष्टाध्यायीस्थाधिकारसूत्राणां सङ्कलय्य तेषामध्ययनं वर्णनं विश्लेषणं स्वरूपनिरूपणञ्च कृत्वा निष्कर्षो निष्कासितो विद्यते।

**सैद्धान्तिकाधारः**

संस्कृतवाङ्मयस्य विविधशाखासु प्रणीतास्तत्तद् विषयकग्रन्थाः प्रधानरूपेण सैद्धान्तिकाधारभूताः सन्ति। तेषु यत्र यत्र पाणिनीयाधिकारसूत्रव्याख्यासम्बद्धाः पक्षा उपनिबद्धाः प्राप्यन्ते तेषां ग्रहणेन सैद्धान्तिकाधारो निर्मीयते। व्याकरणविषये मूलग्रन्थकथनेन सूत्र–वार्तिक–भाष्य–टीका–प्रक्रियादिसम्बद्धाः ग्रन्थाः गृह्यन्ते। अत्रानुसन्धानसन्दर्भे मूलग्रन्थकथनेन सूत्रग्रन्था वार्तिकग्रन्थाः, भाष्यग्रन्थाः, व्याख्याग्रन्थाः, टीकाग्रन्था इत्यादयः ग्रन्थाः समादरणेनावलम्ब्यन्ते। तत्र क्रमे व्याकरणमहाभाष्य–काशिकावृत्ति–सिद्धान्तकौमुदी–इत्यादयो ग्रन्थाः सैद्धान्तिकाधारेण स्वीकृता। तथैव विश्लेषणक्रमे सङ्कलिततथ्यानां सन्दर्भस्रोतः प्रदर्शनाय लेखकमितिपृष्ठपद्धतेः (एपीएपद्धतेः), सूत्रसन्दर्भप्रदर्शनाय च संस्कृतसूत्रग्रन्थान्तर्गते व्याकरणशास्त्रे बहुप्रचलिताया अध्याय-पाद-सूत्रसङ्ख्या-पद्धतेः प्रयोगः कृतोऽस्ति। एष एवास्यानुसन्धानस्य सैद्धान्तिकाधारः।

## विषयविश्लेषणम्

उपर्युपस्थापितसैद्धान्तिकपर्याधारमाधृत्यात्र बहुव्रीहिसमासपरिचयपूर्वकं तत्प्रकारविषयकमतभेदविश्लेषणं क्रियते।

**सूत्रस्वरूपं तद्भेदाश्च**

सूचनात् सूत्रमिति सूत्रशब्दस्य व्युत्पत्तिः। सूचनात् सूत्रणाच्चैव......सूत्रस्थानं प्रचक्षते। (सुश्रुतसंहिता, सूत्रस्थान ३) अर्थान् सूत्रयति सूते सूचयति वा सूत्रम्। सूत्रत एव शब्दा प्रतिपद्यन्ते। अतः शब्दप्रतिपत्तिरूपो दोषोऽपि नास्ति। अतः सूत्रत एव शब्दानां निष्पत्तिर्भवति। पाणिनीयसूत्राणां सारवत्त्वादिकं महाभाष्यकारेणानेन वचः प्रकर्षेणोद्घोषितम्—प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचाववकाशे प्राङ्मुख उपविश्य महता यत्नेन सूत्राणि प्रणयति स्म। तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुं किं पुनरियता सूत्रेण, सामर्थ्ययोगान्न हि किञ्चिदत्र पश्यामि शास्त्रे यदनर्थकं स्यात् (पतञ्जलिः,

महाभाष्यम्, १।१।१॥) इति। लोके तत्तदर्थेषु प्रयुक्ताञ्छब्दान् यदेतादृशेन नियमरूपाऽवेष्टनेन निबध्नाति, येन तेषु विकारो न भवति तत् सूत्रमुच्यते। उक्तञ्च कातन्त्रवृत्तिटीकायाम्—

अर्थान् सूत्रयति सूते सूचयति वा सूत्रम्। (कातन्त्रवृत्तिटीका १।१।९॥)

एवमेव सूत्रस्य परिचयक्रमे तन्त्रवार्तिके—

सूत्रेष्वेव हि तत्सर्वं यद् वृत्तौ यच्च वार्तिके।
सूत्रं योनिरिहार्थानां सूत्रे सर्वं प्रतिष्ठितम्॥ (तन्त्रवार्तिकम्, २।३।६।१६॥)

महर्षिवररुचिना सूत्रस्य लक्षणमित्थं कृतम्—

अल्पाक्षरमसन्दिग्धं सारवद् गूढनिर्णयम्।
निर्दोषं हेतुमत्तथ्यं सूत्रमित्युच्यते बुधैः॥ (वररुचिः, कविकल्पद्रुमः १।१।१॥)

पाराशरोपपुराणे सूत्रस्य परिचयप्रदानक्रमे–

अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम्
अस्तोभमानवद्यञ्च सूत्रं सूत्रविदो विदुः॥ (पाराशरोपपुराणम्, १८।१३॥)

सूत्रमल्पाक्षरं भवेत्। सूत्रे यावच्छक्यं तावत् केवलमक्षराणामुपयोगो भवतु। सूत्रमसन्दिग्धमपि स्यात्। सूत्रे अस्पष्टता न भवेत्। सारवद् नाम अर्थवद् एव सूत्रम्। विश्वतोमुखम् बृहद्विषयकमपि सारवद् नाम अर्थवदेव सूत्रमित्युच्यते। अत्यन्तं सङ्क्षिप्तरूपेण अर्थं बोधयेदिति सारवद्। अस्तोभं यस्य स्थाने अन्यस्य कस्यचिदपि स्थापनेन ज्ञानपूर्णता न भवति तद् अस्तोभम्। अनवद्यम् अवद्यं नाम दोषः। सूत्रे दोषः वा अपराधः वा न भवति। उपरि विवृतान् नियमान् यद् वाक्यं पालयति तदेव सूत्रमित्युच्यते। पाणिनीयतन्त्रे सञ्ज्ञा–परिभाषा–विधि–नियम–अतिदेश–अधिकारभेदात् सूत्राणि षड्विधानि समुपलभ्यन्ते।

तथा हि–

सञ्ज्ञा च परिभाषा च विधिर्नियम एव च।
अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम्॥ (वररुचिः, कविकल्पद्रुमः, १।१।१।)

अधिकारो विधिः सञ्ज्ञा निषेधो नियमस्तथा।
परिभाषा च शास्त्रस्य लक्षणं षड्विधं विदुः॥
(वररुचिः, कविकल्पद्रुमः, कलापचन्दः, कविराजटीका १।१।१)

पाणिनीयतन्त्रे समुपलब्धानि षड्विधानि सूत्राणि मध्येऽत्राऽनुसन्धानेऽधिकारसूत्रस्वरूपविषये विमर्शो विधीयते।

**को नामाधिकारः ?**

अधिकरोतीति अधिकारः। अधिकरणमधिक्रियतेऽनेनेति वाऽधिकारः। अधिकारसूत्रस्य लक्षणं भवति उत्तरोत्तरगमनम्। तत्र वक्ष्यमाणार्थसङ्क्षेपाय कार्यिकार्यनिमित्तानां यदुदीरणं सोऽधिकारः। अधिकरोतीत्यनेन पाणिनीयसूत्रसम्बन्धे केनाऽपि सूत्रेण विहितं कार्यं किं सूत्रं यावत् प्रचलतीति विवेचनसम्बद्धं सन्दर्भं स्मारयति। अतश्च को नामाधिकारः इति जिज्ञासायां ? स्वदेशे लक्ष्यसंस्कारकवाक्यार्थबोधाजनकत्वे सति विधिशास्त्रैकवाक्यतापन्न-लक्ष्यसंस्कारकवाक्यार्थबोधजनकत्वमधिकारसूत्रत्वमिति वदन्ति वैयाकरणाः। परं यत्र सूत्रैकदेशस्यैवाधिकारः प्रवर्तते तत्र वाक्यार्थबोधजनकत्वं सम्भवति (जानकीप्रसादः द्विवेदी, कात्रन्त्रव्याकरणविमर्शः, पृ. २५०)। अधिकारसूत्रं नाम कस्यापि सूत्रग्रन्थस्य वा भाष्यग्रन्थस्यान्तर्गते कः विषयः कुत्र यावत् प्रवर्तते इति दर्शयन् सूचकसूत्ररूपेण भवति। यदा किञ्चन कार्यं तस्य च निमित्तानि सङ्क्षेपेणोक्त्वा आगामिसूत्राणां प्रकाशनं क्रियते, तदा तदधिकारसूत्रं इति निर्दिश्यते। अतोऽधिकार उत्तरोत्तरगमनेन तस्य प्रभावोल्लेखनेन वा तस्य सूत्रस्यार्थापनेन ज्ञायते।

**स्वरितेनाधिकारसूत्रस्याशयः**

आचार्यपाणिनिनाष्टाध्याय्यां प्रथमाध्यायस्य तृतीयपादे स्वरितेनाधिकारः १।३।११॥ इति सूत्रमारचितम्। स्वरितेनेति तृतीयाया एकवचनं पदं, अधिकार इति प्रथमाया एकवचनमिति द्विपदमिदं सूत्रमस्ति। अधिकारनिर्णयपरिभाषाविधायकसूत्रमिदम्। अस्मिन्सूत्रपाठेऽनुवृत्तेर्निर्देशः स्वरितस्वरेण कृतः। अष्टाध्याय्या उच्चारणे येषां शब्दानां स्वरितस्वरेणोच्चारणं क्रियते, ते शब्दा अग्रिमसूत्रेष्वनुवृत्तिरूपेण स्वीकर्तुं शक्यन्त इत्यस्य सूत्रस्याशयः। अधिकारो नाम व्यापृतिः। यथा लोकेऽधिकृतो ग्रामेऽसाविति व्यापृत इति गम्यते। शब्दस्य च उत्तरसूत्रेष्वनुवृत्तिरेव व्यापृतिः। स्वरितेन स्वरविशेषेणाधिकारोत्तरत्रानुवृत्तिरूपव्यापारः प्रत्येतव्यः। यत् पदं शास्त्रकृता स्वरिताख्यस्वर-विशेषविशिष्टमुच्चारितं तदुत्तरसूत्रेष्वनुवर्तनीयमित्याशयोऽस्ति। स्वरितत्वयुक्तमित्यादिना आनुनासिक्यवत्स्वरितोच्चारण-मपि प्रतिज्ञागम्यम्। अनुवृत्तावुत्तरावधिस्तु व्याख्यानादेवावगन्तव्यः। यद्यपि निवृत्तिवदनुवृत्तिरपि व्याख्यानादेव भविष्यतीति किं सूत्रेण, तथापि भाष्ये एतत्प्रयोजने बहुधा प्रपञ्चितम्।

स्वरितेनाधिकारः १।३।११॥ इदं पाणिनीयव्याकरणे परिभाषासूत्रमस्ति, यदधिकारसूत्रेषु स्वरितस्वरस्य प्रयोगं निर्दिशति। सूत्रे स्वरितेनेत्युक्त्या— स्वरितचिह्नयुक्तं पदं वा स्वरितस्वरयुक्तं शब्दं वा स्वरितोच्चारणसम्बन्धिनी काचित् संज्ञा बोध्यते। स्वरितेन— स्वरितस्वरेण, अर्थात् स्वरितस्वरयुक्तेन शब्देन। अधिकारः— अधिकारसूत्रं यत् किञ्चन सूत्रं तस्यान्तर्गतान्यन्यसूत्राणि यावत् प्रवर्तन्ते। यदा पाणिनिः किञ्चनाधिकारसूत्रं स्थापयति। अर्थात् यत् सूत्रं कस्यचन विशेषविधेर्वा विषयविस्तारस्यारम्भं सूचयति— तदा तस्मिन् सूत्रे स्वरितस्वरः प्रयुज्यत इत्यनेन सूत्रेण निर्दिश्यते। अतोऽधिकारसूत्रं स्वरितचिह्नयुक्तं वा स्वरितसहितं भवतीति ज्ञायते।

अतः स्वरितो नाम स्वरदोषो वर्णधर्मीरिति ज्ञायते। तेन चिह्नेनाधिकारो वेदितव्योऽधिकारो विनियोगः। स्वरितगुणयुक्तं शब्दस्वरूपमधिकृतत्वादुत्तरत्रोपतिष्ठते। प्रतिज्ञास्वरिताः पाणिनीयाः। पूर्वपरनित्यन्तरङ्गा-पवादानामुत्तरोत्तरं बलीयः। असिद्धं बहिरङ्गमन्तरङ्गे। अकृतव्यूहाः पाणिनीयाः। (नागेशभट्टः, परिभाषेन्दुशेखरः परिभाषा, ३८, ५०, ५६) इत्याद्याः परिभाषाः समुपलभ्यन्ते। परादीनां मध्ये पूर्वपूर्वापेक्षया उत्तरमुत्तरं शास्त्रं बलवत्तपरमित्यर्थः। उत्तरोत्तरमित्यत्रानुपूर्व्ये द्वे वाच्ये इति द्वित्वम्। परापेक्षया नित्यान्तरङ्गापवादाः, नित्यापेक्षयाऽपि अन्तरङ्गापवादौ, अन्तरङ्गापेक्षयापि अपवाद इत्येवं क्रमेण पूर्वपूर्वापेक्षया उत्तरोत्तरबलवत्त्वमिति फतितोऽर्थः। परं विप्रतिषेधसूत्रात् बलवत्।

**किं नाम स्वरितम् ?**

उदात्त–अनुदात्त–स्वरितभेदेन स्वरास्त्रयो भवन्ति। पाणिनीयशिक्षायां स्वरनिर्धारणक्रमे चोक्तम्– उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः। (पाणिनीयशिक्षा, श्लो. ११।) ॥ एते स्वराः स्वतन्तत्रया उच्चरिता भवन्ति। उच्चैरुदात्तः १।२।२९॥ इति सूत्रव्याख्यानावसरे सिद्धान्तकौमुद्यामुक्तम्– ताल्वादिषु सभागेषु स्थानेषूर्ध्वभागे निष्पन्नोऽजुदात्तसंज्ञको भवतीति। ताल्वादिस्थानानामूर्ध्वाऽधोभेदेन भागद्वयमस्ति। तत्र ऊर्ध्वभागेनोच्चार्यमाण उदात्तः, अधोभागेनोच्चार्यमाणस्त्वनुदात्तः, अभ्यासज्ञेयश्चायं स्वरविशेषः। नीचैरनुदात्तः १।२।३०॥ ताल्वादिषु स्थानेषु अधोभागे निष्पन्नोऽच् अनुदात्तसंज्ञको भवति। समाहारः स्वरितः १।२।३१॥ उदात्तत्वानुदात्तत्वे वर्णधर्मौ समाह्रियेते यस्मिन् सोऽच् स्वरितसंज्ञः स्यात्। तस्य स्वरितस्यादितः पूर्वभागे अर्धह्रस्वमुदात्तमित्यर्थः प्रतीयते। तथा स्वरितार्धस्योदात्तत्वे प्रातिशाख्यवचनमाधृत्यप्रौढमनोरमायाम् –

अनुदात्तः परः शेषः स उदात्तश्रुतिर्न चेत्।

उदात्तं वोच्यते किञ्चित्स्वरितं वाक्षरं परम्॥

(प्रौढमनोरमा, तस्यादित उदात्तमर्धह्रस्वम् १।२।३२॥ सूत्रस्य व्याख्याने।)

इति स्वरितस्य पूर्वभाग उदात्तः शेष उत्तरभागोऽनुदात्तः प्रत्येतव्यः। उत्तरभागानुदात्तस्य उदात्तश्रुतिः क्वचिद् भवति तदाह– तस्यादित उदात्तमर्धह्रस्वम् १।२।३२॥ ह्रस्वग्रहणमतन्त्रम्। स्वरितस्यादितोऽर्धमुदात्तं बोध्यम्। उत्तरार्धं तु परिशेषादनुदात्तम्। तस्य चोदात्तस्वरितपरत्वे श्रवणं स्पष्टम्। अन्यत्र तूदात्तश्रुतिः प्रातिशाख्ये प्रसिद्धा। पाणिनीयशिक्षायां स्वरस्योच्चारणविषये उदात्तस्वरं तर्जन्यां सङ्केत्य जानीयात्। प्रचयस्वरं मध्यमायामङ्गुल्यां सङ्केत्य जानीयात्। अनुदात्तं स्वरं कनिष्ठिकायां सङ्केत्य जानीयात्। स्वरितं स्वरमनामिकायां सङ्केत्य जानीयात्।

उक्तञ्च पाणिनीयशिक्षायाम् –

अन्तोदात्तमाद्युदात्तमुदात्तमनुदात्तं नीचस्वरितम्।

मध्योदात्तं स्वरितं त्र्युदात्तमिति नव पदशय्याः ॥ (पाणिनीयशिक्षा, श्लो. ४६ ।)

अन्तोदात्ताद्युदात्तादिनवप्रकारकाः पदविशेषरूपा पदशय्या भवन्ति। यथा– अग्निः सोमः प्र वो वीर्यं हविषां स्वर्बृहस्पतिरिन्द्राबृहस्पती (ऋग्प्रातिशाख्यम् ३।५)। इत्यत्र क्रमशः अग्निः इति अन्तोदात्तं पदम्। सोमः इति आद्युदात्तं पदम्। प्र इति उदात्तं पदम्। वः इति अनुदात्तं पदम्। वीर्यम् इति नीचस्वरितं पदम्। हविषाम् इति मध्योदात्तं पदम्। स्वरिति स्वरितं पदम्। बृहस्पतिरिति द्व्युदात्तं पदम्। इन्द्राबृहस्पती इति त्र्युदात्तं पदम्। अनुदात्तः स्वर उरःप्रदेशे हस्तं नीत्वा उच्चारणीयः, उदात्तः स्वरः शिरःप्रदेशे हस्तं नीत्वा उच्चारणीयः, स्वरितः स्वरः कर्णमूलप्रदेशे हस्तं नीत्वा उच्चारणीयः, प्रचयः स्वर आस्यप्रदेशे हस्तं नीत्वा उच्चारणीयो भवति।

स्वरितस्वरयुक्तं पदं यदि सूत्रेऽस्ति, तर्हि तत् सूत्रमधिकारसूत्रं भवितुं शक्नोति। यथा, कर्तरि शप् ३।१।९१॥ अत्र कर्तरीत्येतत् पदं स्वरितेन उच्चार्यते। अतोऽयं कर्तरीति स्वरितस्वरयुक्तं पदमस्ति। तस्मादिदं सूत्रं कर्तर्यर्थे शप्–प्रत्ययविधानस्याधिकारसूत्रं भवति, यावत् कर्मणीत्यादि सूत्रैः तद्विषयः प्रवर्तते। स्वरितेनाधिकार इत्यनेन सूत्रेण पाणिनिरस्य नियमं स्थापयति– यत्र स्वरितस्वरयुक्तं पदं दृश्यते, तदधिकारसूत्रं भवतीति। परन्तु अद्यपर्यन्तमधिकारसूत्राणि कति सन्ति ? कानि च तानि ? तेषां लक्षणं किम् ? तेषां प्रयोजनं किम् ? प्रयोगस्थलं कीदृशम् ? इति एकस्मिन्स्थाने सम्यगुपस्थापितमिति न दृष्टमतस्तदावश्यकता परिपूर्तयेऽनुसन्धानकार्येऽस्मिन् प्रवृत्तोऽहम्।

## अधिकारसूत्रलक्षणम्

अधिकरणमधिक्रियतेऽनेनेति वाऽधिकारः। स्वदेशे लक्ष्यसंस्कारकवाक्यार्थबोधाजनकत्वे सति विधिशास्त्रैकवाक्यतापन्नलक्ष्यसंस्कारकवाक्यार्थबोधजनकत्वमधिकारसूत्रत्वमिति वदन्ति वैयाकरणाः। परं यत्र सूत्रैकदेशस्यैवाधिकारः प्रवर्तते तत्र वाक्यार्थबोधजनकत्वं सम्भवति। (जानकीप्रसादः द्विवेदी, कात्रन्त्रव्याकरणविमर्शः, पृ. २५० ।) अधिकारसूत्रस्य लक्षणं भवति उत्तरोत्तरगमनम्। तत्र वक्ष्यमाणार्थसङ्क्षेपाय कार्यिकार्यनिमित्तानां यदुदीरणं सोऽधिकारः। अतोऽधिकारसूत्रस्य मुख्यं लक्षणं भवति—पूर्वस्मात् परं यावत् सम्बन्धः प्रवर्तते, तावत् तस्याधिकारत्वं भविष्यति। यदा कार्यकारणनिमित्तानां संक्षेपेण निरूपणं किञ्चन सूत्रं करोति, तदा तस्याधिकारत्वं सिध्यति। अधिकारः कः? इति जिज्ञासायामुच्यते यत्– पूर्वसूत्रस्थपदस्य परसूत्रेषु या उपस्थितिः सैवाऽधिकारशब्देन सूच्यते। पूर्वसूत्रे निर्दिष्टं किञ्चन पदमर्थो वा यदि परवर्तिषु सूत्रेष्वपि प्रवर्तते, तर्हि स अधिकारः, इत्युच्यते। अयं भावः पूर्वसूत्रस्थपदस्य परसूत्रेषु योपस्थितिः सैवाधिकारशब्देन वक्तुं शक्यते।

स्वस्मिन् सूत्रे फलशून्यत्वे सति परत्र सूत्रे फलसम्बन्धत्वमधिकारत्वमिति यत् कैश्चिदुच्यते तत् सम्पूर्णसूत्रस्याधिकारत्वमुद्दिश्य विज्ञेयम्। कश्चन शब्दः यदि स्वस्मिन् सूत्रे फलं न ददाति (अर्थप्राप्तिर्न भवति), किन्तु परत्र सूत्रे तेन सह फलसम्बन्धः दृश्यते, तर्हि कैश्चनाचार्यैस्तस्याधिकारत्वमुक्तम्। किन्तु एषा व्याख्या सम्पूर्णस्य

सूत्रस्याधिकारत्वं द्योतयति। परं यत्रैकदेशस्यैवानुवृत्तिरिष्यते तत्र स्वस्मिन् सूत्रेऽपि फलसत्वेनास्य लक्षणस्याप्रवर्तनाल्लक्षण–सामान्यं बिल्वेश्वराचार्येण निर्दिष्टम्। यत्र केवलं सूत्रस्यांश एकः शब्दः शब्दार्थो वाऽनुवर्तते, तत्र स्वस्मिन् सूत्रेऽपि स फलदायकोः भवति। अतस्तस्मिन् स्थले उक्तमधिकारलक्षणं (फलशून्यत्वे परत्र फलसम्बन्धः) प्रवर्तते इति न, किन्तु केवलं समानरूपेण तस्य स्वभावः (लक्षणसामान्यम्) भवतीति बिल्वेश्वराचार्येण निर्दिष्टम्।

अर्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः, इति लोकप्रसिद्धन्यायेनाऽपि वैयाकरणाः सर्वदैवाल्पक्षरव्यवहारेण व्यापकमर्थं प्रकाशयितुमिच्छन्तीति विज्ञायते। अनुवृत्तिकौशलं अधिकारसूत्रञ्च वैयाकरणानामेतादृशीमिच्छां पूरयति। यथा– कारके १।४।२३।। इत्येकमधिकारसूत्रं विद्यते। परवर्तिषु केषुचित् सूत्रेष्वस्य प्रत्यक्षोल्लेखः न भवति परन्तु तत्र सूत्रार्थपरिस्फुटनेऽस्य सूत्रस्यार्थः ग्रहणीयो भवति। कर्तुरीप्सिततमं कर्म १।४।४९।। इति सूत्रे कारकपदस्योल्लेखो नास्ति। तथाप्यत्र सूत्रार्थपरिस्फुटने कारके इति सूत्रस्य प्रसङ्गः समायाति। अनुवृत्तौ अपि पूर्ववत्रिसूत्रेषूल्लिखितपदस्य परसूत्रेषु प्रत्यक्षोल्लेखाभावेऽपि सूत्रार्थपरिस्फुटने तत्पदस्य ग्रहणं भवति। तथैव अधिशीङ्स्थासां कर्म १।४।४६।। इति सूत्रे सूत्रार्थकरणे पूर्ववर्तिनः आधारोऽधिकरणम् १।४।४५।। इति सूत्रात् आधार इति पदस्य ग्रहणं भवति। किन्तु अधिशीङ्स्थासां कर्म १।४।४६।। इति सूत्रे आधार इति पदस्य प्रत्यक्षोल्लेखः नैव दृश्यते। इत्यनेन व्यञ्जितं यत्, यत्सूत्रस्याधकिारः कश्चित्सूत्राद् निश्चितसूत्रपर्यन्तं सूत्रमालायां प्रवर्तते, सोऽधिकारसूत्रमित्युच्यते। अधिकारसूत्रं स्वस्याधिकारविषयकबोधं परवर्ती सूत्रेष्वपि जनयति।

सिंहावलोकितः, मण्डुकप्लुतिः, गङ्गास्रोतःप्रवाहश्चेति वैयाकरणाः त्रिविधमधिकारं स्वीकुर्वन्ति। पतञ्जलिना पातञ्जलमहाभाष्येऽधिकारसूत्राणि प्रकारत्रये विभक्तानि लभ्यन्ते। अधिकारो नाम त्रिप्रकारः, कश्चिदेकदेशस्थः सर्वं शास्त्रमभिज्वलयति, यथा प्रदीपः सुप्रज्वलितः सर्वं वेश्माभिज्वलयतीति। अपरोऽधिकारो यथा रज्ज्वा अयसा वा वद्धं काष्ठमनुकृष्यते तद्वदनुकृष्यते चकारेण। अपरोऽधिकारः प्रतियोगं तस्यानिर्देशार्थ इति योगे योगे उपतिष्ठते तद् यदैष पक्षोऽधिकारः प्रतियोगं तस्यानिर्देशार्थ इति, तदा हि यदेवादः पुरस्तादवयवष्ठ्यर्थम्।

१. दीपवत् एकदेशस्थाधिकारः, एकदेशस्थः सर्वं शास्त्रमभिज्वलयति। यथा प्रदीपः एकस्मिन्नेव स्थले स्थित्वा समग्रं गृहं प्रकाशितं करोति, एवं कश्चनाधिकारः सम्पूर्णं शास्त्रं व्याप्नोति। अर्थादधिकारः शास्त्रारम्भे स्थाप्यते, समग्रे शास्त्रे प्रवर्तते। यथा– विभाषा इत्यधिकारोऽनेकसूत्रपर्यन्तं व्याप्नोति।

२. अनुकृष्टकाष्ठवत्, यथा रज्ज्वा आकृष्यमाणं काष्ठमनुकृष्यते, तथैव कश्चन अधिकारः परवर्ती सूत्राणि स्वसङ्केतानुसारं आनयति। अर्थात्, अधिकारः क्रमशः सूत्रानुगतं वहति।

३. प्रतिसूत्रप्रवृत्तयोगयुक्ताधिकारः, प्रतियोगं तस्याऽनिर्देशार्थ इति योगे योगे अधिकारः उपतिष्ठते। अर्थात् प्रतिसूत्रं प्रतिसूत्रं पुनः पुनः प्रवर्तमानोऽधिकारः, यत्र सर्वत्र स्पष्टतया प्रयोगं विनैव तस्य सञ्चरणं दृश्यते। यथा, कर्तरि

शप्—इत्यधिकारे, तद्धिताः प्रत्ययाः पुनः पुनः प्रयोगनिरपेक्षं प्रवर्तन्ते। (पतञ्जलिः, व्याकरणमहाभाष्यम्, पा.सू., षष्ठी स्थानेयोगा १।१।४९।। सूत्रव्याख्याने।) इति।

परन्तु कातन्त्रव्याख्याकारा अधिकारस्य चातुर्विध्यमुररीकुर्वन्ति। ते त्रिविधं न स्वीकुर्वन्ति, परञ्च चतुर्विधरूपेणाधिकारं विवेचयन्ति। कातन्त्रव्याकरणस्य व्याख्याकारास्त्वधिकारस्य चतुर्विधरूपं वर्णयन्ति—गोयूथः, सिंहदृष्टिः, मण्डुकप्लुतिः, गङ्गास्रोतःप्रवाहश्चेति।

तदुक्तम्–

गोयूथः सिंहदृष्टिश्च मण्डूकप्लुतिरेव च।

गङ्गास्रोतःप्रवाहश्च ह्यधिकारश्चतुर्विधः।। इति।

(कात्रन्त्रव्याकरणस्य मङ्गलाटीका, ३।८।५।।)

कस्यचिच्छब्दस्य कतिपयसूत्रपर्यन्तमनुवृत्तिर्गोयूथः। सिंहदृष्टिवत् अग्रे पठितस्य सूत्रस्य कतिपयशब्दानां पृष्ठतोऽनुवृत्तिः सिंहावलोकिताख्या, तदपेक्षयाऽधिकसङ्ख्यकसूत्रानुवृत्तिर्गङ्गा– स्रोतशब्दवाच्या। आकाङ्क्षावशात् क्वचिदक्रमेण मण्डूकानामुत्प्लवनमिव केषाञ्चिच्छब्दानामनुवृत्तिर्मण्डूकप्लुतिरित्यभिधीयते। स्वस्मिन् सूत्रे फलशून्यत्वे सति परत्र सूत्रे फलसम्बन्धत्वमधिकारत्वम् इति यत् कैश्चिदुच्यते तत् सम्पूर्णसूत्रस्याधिकारत्वमुद्दिश्य विज्ञेयम्। परं यत्रैकदेशस्यैवानुवृत्तिरिष्यते तत्र स्वस्मिन् सूत्रेऽपि फलसत्वेनास्य लक्षणस्याप्रवर्तनाल्लक्षणसमान्यं बिल्वेश्वराचार्येण निर्दिष्टम्। उक्तञ्च–

कार्यिकार्यनिमित्तानां पदानां यदुदीरणम्।

वक्ष्यमाणार्थसङ्क्षेपायाधिकारः स उच्यते।।

(कात्रन्त्रव्याकरणस्य बिल्वेश्वरटीका, ३।३।१।।)

अधिकारसूत्रस्य लक्षणं भवति– उत्तरोत्तरगमनम्। यत् सूत्रं निश्चितावधिसूत्रपर्यन्तमुत्तर–सूत्रेषु गच्छति तदधिकारसूत्रनाम्नोच्यते। अधिकारः सम्पूर्णसूत्रस्य, सूत्रांशपदस्य पदैकदेशस्य वा भवति। धातोः ३।१।९१।। अङ्गस्य ६।४।१।। इत्यनयोरधिकारसूत्रयोः सम्पूर्णस्याऽधिकार उत्तरसूत्रेषु गच्छति। धातोः ३।१।९१।। इत्यस्याऽधिकारस्तृतीयाध्ययापर्यन्तम्, अङगस्य ६।४।१।। इत्यधिकारः सप्तमाध्यायपर्यन्तमस्ति। इको यणचि ६।१।७७।। इति सूत्रस्य अचि इति पदमग्रे अनुवर्तते। एतानि सूत्राणि पदाधिकारस्योदाहरणत्वेन स्वीकर्तुं शक्यन्ते। सूत्रैकदेशस्याऽनुवृत्तेरुदाहरणमस्ति संख्याव्ययादेर्ङीप् ४।१।२६।। इति। अस्मात् दामहायनान्ताच्च ४।१।२७।। इति सूत्रे संख्यादिग्रहणमनुवर्तते। झोऽन्तः ७।१।३।। इति सूत्रे आयनेयीनीयियः फढखछघां प्रत्ययादीनाम् इति सूत्रात् प्रत्ययग्रहणमनुवर्तते। अत्रेदमेव कारणम् यत् पाणिनिना अष्टाध्याय्यां स्वरितेनाधिकारः १।३।११।। इति सूत्रे अधिकारस्य

कृते स्वरितत्वप्रतिज्ञा विहिता। (भट्टोजिदीक्षितः, सिद्धान्तकौमुदी, पृ. ३५।) इदमस्ति परिभाषासूत्रम्। स्वरितत्वप्रतिज्ञया न केवलमनुवृत्तिर्भवति, किन्त्वपकर्षोऽपि जायते। अत उत्तरोत्तरगमनमधिकार इति लक्षणं प्रायिकमेव मन्तव्यम्। एवं प्रकारेण भगवता पाणिनिना अष्टाध्याय्यां षड्विधसूत्रमुखेन लघुनोपायेन शब्दोपदेशो विहितः।

**अधिकारभेदाः**

एकत्रोपात्तस्यान्यत्र व्यापारोऽधिकारः। उत्तरोत्तरगमनमधिकार इत्यपि कथ्यते। अर्थात् सूत्रार्थपरिष्फुटने येन कौशलेन पूर्ववर्तिसूत्रेषूल्लेखितः कश्चनशब्दः अर्थो वा परसूत्रेष्वनुवर्तते सः एवानुवृत्तिरधिकारो वा कथ्यते। पतञ्जलिना अदूरभवश्च ४।२।७०॥ इति सूत्रभाष्ये गोयूथवदधिकारस्य उल्लेखः कृतः। अत एव पाणिनीयव्याकरणे गङ्गाप्रवाहवदनुवृत्तिः, मण्डुकप्लुतिवदनुवृत्तिः, सिंहावलोकन–न्यायानुवृत्तिः, गोयूथवदनुवृत्तिश्चेति चतुर्विधा अधिकाराः दृश्यन्ते। तेषां लक्षणम् यथा सन्ति –

***(क) सिंहावलोकितः***

सिंहो यथा गमनक्रमे प्रतिपादचालनं वामदक्षिणपार्श्वतः पश्चभागं विलोकयति निरीक्षते च किमपि विपरीतं तत्त्वमस्ति न वेति तद्वदत्रापि पूर्वसूत्रेषु निहितां वृत्तिं वारं वारं विलोक्यार्थापनं विधेयमिति निर्देशः सिंहावलोकितन्यायेनाधिकार इति मन्तव्यम्। कस्यचिच्छब्दस्य कतिपयसूत्रपर्यन्तमनुवृत्तिः सिंहावलोकिताख्या। कश्चन शब्दः यदि कतिपयेषु सूत्रेष्वनुवर्तते, तर्हि तस्यानुवृत्तेर्नाम सिंहावलोकिताधिकारः। यथा सिंहः गच्छन् स्वपृष्ठतोऽपि विलोकयति, तथैव इदं नाम न्यायार्थकञ्च। सिंहावलोकनन्यायः लोकतः प्रसिद्धः। सिंहः यथा कश्चित् मृगं हत्वा अग्रे गच्छन् अन्योऽपि कश्चित् मृगश्चेत् स्यात् तदा तमपि हनिष्यामि इति बुद्ध्या पृष्ठदेशावलोकनं पुरोदेशावलोकनं च करोति, दृष्टिपथमागतं मृगादिकं च हन्ति इति प्रसिद्धमस्ति तथा एकस्य शब्दस्य पुरतः पृष्ठे च यत्र उभयो अन्वयः तत्र अस्य प्रवृत्तिः स्यात्। सिंहदृष्टिवदग्रे पठितस्य सूत्रस्य कतिपयशब्दानां पृष्ठतोऽनुवृत्तिः सिंहावलोकनम्। यथा– सरूपाणामेकशेष एकविभक्तौ १।२।६४॥ इति।

***(ख) मण्डूकप्लुतिः***

यथा मण्डूको भूमौ कञ्चित्भागं पदैरस्पृष्ट्वैव प्लवते उत्प्लुत्योत्प्लुत्य गच्छति तद्वदत्राप्यधिकारे कस्मिन्नपि सूत्रे विद्यमानं पदं तदग्रे कतिपये सूत्राणि विहाय उत्प्लुतिन्यायेन तदुत्तरवर्तिसूत्राण्यधिकरोति। आकाङ्क्षावशात् क्वचिदक्रमेण मण्डूकानामुत्प्लवनमिव केषाञ्चिच्छब्दानामनुवृत्तिर्मण्डूकप्लुतिरित्यभिधीयते। यदा आकाङ्क्षानुसारं कश्चन शब्दः प्रत्येकं सूत्रे न प्रवर्तते, किन्तु क्वचिदेकं वा द्वे वा सूत्रे विहाय तदन्तर्वर्तिनि सूत्रे पुनरनुवर्तते, तर्हि तस्य नाम मण्डूकप्लुतिरित्युच्यते। यथा मण्डूकः कूपे कूपे प्लवते, तथैव सूत्रगतशब्दोऽप्यनुवर्तत इति। मण्डूकः यथा एकस्मात् स्थानात् मध्यवर्तिस्थानमस्पृष्ट्वा अन्यत्र उत्प्लवते, तथैव किञ्चित् सूत्रं तदव्यवहितपरवत्तिसूत्रं सूत्रकदम्बकं वा उल्लङ्घ्य अन्यस्मिन् सूत्रेऽनुवर्तते चेत् तदा स मण्डूकप्लुत्यधिकारः इत्युच्यते। इको यणचि ६।१।७७॥ इति

सूत्रस्थितम् अचीति पदम् मण्डूकप्लुत्यधिकारेण अवङ् स्फोटायनस्य ६।१।१२३॥ इत्यस्मिन् सूत्रे, तावतिथं ग्रहणमिति लुग्वा ५।२।७७॥ इति सूत्रस्थितं वेति पदञ्च श्रोतियंश्छन्दोऽधीते ५।२।८४॥ इत्यस्मिन् सूत्रेऽनुवर्तते। मध्ये कतिपयसूत्राणि अतिक्रम्य तदनन्तरवर्तिसूत्रेषु पूर्वतनसूत्रस्थपदानामनुवर्तनम् मण्डुकप्लुतिः। यथा– उञि च पदे ८।३।२१॥ इति।

***(ग) गङ्गास्रोतःप्रवाहः***

गङ्गाया अविच्छिन्नप्रवाहवत् कस्यापि पदस्य सूत्रस्य वा अनुवृत्तिर्भवति चेत् सः गङ्गाप्रवाहाधिकार इत्युच्यते। यथा गङ्गायाः प्रवाहः निरन्तरं प्रवर्तते, तथा अधिकारोऽपि उत्तरोत्तरसूत्रेषु निरन्तरं प्रवर्तते। मण्डूकप्लुत्यधिकारापेक्षया अधिकसङ्ख्यक–सूत्रानुवृत्तिर्गङ्गास्रोतशशब्दवाच्या। तस्मात् सिंहावलोकितादपेक्षया यद्यधिकेषु सूत्रेष्वनुवृत्तिः दृश्यते, तर्हि सोऽधिकारः गङ्गास्रोतः, इत्युच्यते। यथा, गङ्गायाः प्रवाहः अनवरतं प्रवर्तते, तथैव तस्य पदस्य प्रभावः सूत्रान्तं वा यावत् प्रसृतो भवति। अष्टाध्याय्यां द्वितीयाध्यायस्य प्रथमपादस्य एकविंशतिसङ्ख्यकसूत्रस्य अव्ययीभावः १।१।२१॥ इत्यस्य सूत्रस्य अन्यपदार्थे च संज्ञायाम् २।१।२१॥ इति एकविंशतितमसूत्रपर्यन्तम् अविरतत्वेनानुवर्तनं भवतीति अत्र गङ्गाप्रवाहवदधिकारो दृश्यते। पूर्वतनसूत्रस्थपदानां क्रमश उत्तरोत्तरसूत्रेष्वनुवर्तनं गङ्गाप्रवाहः। यथा– ङ्याप्प्रातिपदिकात्।४।१।१॥ इति।

***(घ) गोयूथः***

गोयूथवदानुवृत्तिः। महामुनिना पतञ्जलिना अदूरभवश्च ४।२।७०॥ इति सूत्रभाष्ये उक्तम्– गोयूथवदधिकारा भवन्ति। तद्यथा, गोयूथमेकदण्डप्रघट्टितं सर्वं समं घोषं गच्छन्ति। तद्वदधिकाराः, इति। तदस्मिन्नस्तीति देशे तन्नाम्नि ४।२।६७॥, तेन निर्वृत्तम् ४।२।६८॥, तस्य निवासः ४।२।६९॥, अदूरभवश्च ४।२।७०॥ चेति पाणिनीयसूत्रचतुष्टयस्य समावेशेन गोयूथाधिकारः दृश्यते। एतेन अदूरभवश्च ४।२।७०॥ इति सूत्रस्यार्थः सम्पूर्णः भवति। अतः कथयितुं शक्यते केषाञ्चिच्छब्दानां कतिपयसूत्रपर्यन्तमनुवृत्तिर्गोयूथः। यथा– तस्मिन्निति निर्दिष्टे पूर्वस्य।१।१।६६॥ इति।

**व्याकरणशास्त्रेऽनुवृत्तिव्यवस्था**

व्याकरणशास्त्रे सूत्रेष्वदृष्टम्पदं सूत्रान्तरादनुवर्तनीयं सर्वत्र। इत्यस्य वाक्यस्याशयो सर्वत्रैव परिपालनीयो भवति। सूत्रेषु– सूत्रनाम्नां समूहेषु, पाणिन्यादीनां व्याकरणसूत्रेषु। अदृष्टं पदम्– यत् पदं किञ्चन सूत्रे प्रत्यक्षं न दृश्यते। सूत्रान्तरात्– अन्यस्मात् सूत्रात्, पूर्वस्मात् सूत्रात्। अनुवर्तनीयम्– अनुसर्तव्यम्, तत्र तत् पदं स्थापनीयम् इति। सर्वत्र– यत्र कुत्रापि, सर्वेषु सन्दर्भेषु भवतीति।

व्याकरणशास्त्रे, विशेषतया पाणिनीयसूत्रेषु, सूत्राणि लघूनि, सुसङ्गतानि च भवन्ति। पाणिनिर्यदा सूत्राणि रचयति, तदा सर्वाणि पदानि प्रत्येकस्मिन्नेव सूत्रे न लिखति, अपि तु पूर्वस्मात् सूत्रात् किञ्चन पदं गृहीत्वा तदनन्तरं सूत्रेऽपि तत्सम्बद्धार्थं प्रकाशयति। एवं यदा किञ्चन पदं सूत्रे न दृश्यते (अदृष्टं भवति), किन्तु तस्य युक्त्या तत्सम्बन्धः

पूर्वस्मात् सूत्रात् ज्ञायते, तर्हि तदपदं सूत्रान्तरात् अनुवर्त्य विचारणीयं भवति। एवं प्रकारेण अनुवृत्तिप्रणाली सञ्चलन्त्यस्ति। एषानुवृत्तिः सूत्ररचनायां लाघवस्य साधनम्, अपुनरुक्तेः परिहारः, सूत्रस्य सम्बन्धस्य स्पष्टता च प्रकटयति। अतः सूत्रेषु यत् पदं न दृश्यते, तत् यदि अन्यस्मिन् सूत्रे दृश्यते च तत्र युक्त्या सम्बद्धं भवति, तर्हि तत् सर्वत्र अनुसर्तव्यमिति व्याकरणशास्त्रस्यानिवार्यं नियमं प्रतिपादयति।

**अधिकारस्यानुवृत्तिः**

अधिकारस्यानुवृत्तिर्विषये लक्ष्यसंस्कारबोधजनकत्वं चाधिकारसूत्रत्वमिति पूर्वं विदितमेव। स्वप्रदेशे लक्ष्यसंस्कारविषयकबोधजनकत्वे सति उत्तरसूत्रानुवृत्त्या लक्ष्यसंस्कारबोधजनकत्वं चेत्, तद्विशिष्टसूत्रमधिकारसूत्रमिति स्वीक्रियते। उत्तरसूत्रेषु गमनशीलत्वमधिकारसूत्रत्वस्य लक्षणम्। सम्पूर्णसूत्रं, सूत्रान्तर्गतपदं वा पदैकदेशोऽप्यधिकारो भवितुमर्हति। अतो वक्तुं शक्यते यत्– अधिकारः सम्पूर्णसूत्रस्य, सूत्रांशपदस्य, पदैकदेशस्य वा भवति। अधिकारः सम्पूर्णं सूत्रं वा सूत्रस्थितं पदम् वा पदस्य कश्चनांशोऽपि स्यात्। यथा– सम्पूर्णसूत्रस्याधिकारः– अङ्गस्य ६।४।१॥ इति सूत्रस्याधिकारः सम्पूर्णं सूत्रं परवर्तिसूत्रेषु प्रवर्तते। सूत्रांशस्याधिकारः– भस्य ६।४।१२९॥ इत्यत्र तु केवलं भ– इत्यस्याधिकारो भविष्यति, न तु सम्पूर्णसूत्रस्य। अर्थात्, यदि किञ्चन सूत्रं स्वयमर्थबोधजनकं तथा परवर्तिसूत्रेष्वपि तत् बोधजनकत्वं प्रदानं करोति, तर्हि तस्याधिकारसूत्रत्वं सिध्यति।

पाणिनीयसूत्रेषु कतिपय अधिकारसूत्राणां कियत्पर्यन्तं प्रवृत्तिरित्येतत् स्पष्टं न दृश्यते। यस्य स्वरितचिह्नेन वा प्राग्वचनद्वारा वाऽधिकारपरिसमाप्तिर्निर्धार्यते। स्वरितेनाधिकारपरिसमाप्तिर्ज्ञायते। कतिपयत्र स्वरितशब्दचिह्नेनाधिकारस्य परिसमाप्तिसूचना दृश्यते। अतः कियन्तमवधिमधिकारोऽनुवर्तत इत्यधिकारपरिमाणज्ञानं तु न ज्ञायते। यथा– प्रागभ्यासविकारेभ्योऽङ्गाधिकारः? धातोरिति प्राक् लादेशेभ्यः? उताध्यायस्य परिसमाप्तेः? एवं तह्र्युभयार्थमिदमधिकारार्थञ्च निवृत्त्यर्थञ्च। कथम्? स्वरितेनाधिकारः स्वरिते दृष्टेऽधिकारो न भवतीत्यर्थः। तेन विंशतिकात् खः ५।१।३२॥ इत्यत्र स्वरितत्वात् द्वित्रिपूर्वादित्यस्य निवृत्तिर्भवति। यत्र स्वरितेन परिसमाप्तिं सूचयितुं न शक्यते, तत्राधिकारपरिसमाप्तेर्निर्देशार्थं प्राक् शब्देन विशेषवचनं करणीयं भवति। यथा– अङ्गस्य प्राक् टेरित्यादौ। कुत्रचिच्च व्याख्यानात् परिमाणनिश्चयः कर्तव्यो भवति। यथा– शङ्का एषा यद् यदि व्याख्यानस्य आधारतः परिमाणं ज्ञास्यते तर्हि सदा व्याख्यानमाश्रयणीयं स्यात्, किन्तु तेन शास्त्रस्य स्वतन्त्रतापि लुप्येत। तस्मात् प्रत्यक्षलिङ्गमूलकं निश्चय एव शोभनः। अधिकारपरिमाणनिश्चितौ स्वरितलिङ्गं, प्राक्सूचना वा व्याख्यानमूलकपरिकल्पनादि सर्वे साधनरूपेण स्वीकरणीयाः। तथापि शास्त्रस्य सम्यक् प्रयोगाय प्रत्यक्षलिङ्गपरं परिमाणनिर्णयो मुख्यः। व्याख्यानन्तु केवलं सहायकमात्रं सिद्ध्यति।

**निष्कर्षः**

महर्षिपाणिनिनाष्टाध्याय्यां सूत्राणामधिकारास्तेषां कार्यक्षेत्रञ्च निर्दिश्यन्ते। येन कारणेन तानि सूत्राणि पुनः पुनः पठितुमनावश्यकानि भवन्ति, तथा च ग्रन्थे लाघवमपि सम्पद्यते। एष्वधिकारेषु केषुचित्स्थलेषु काचित् विचित्रावस्था दृष्टिगोचरीभवति। उत्तरोत्तरगमनमधिकारः, यस्याधारतया क्रिया प्रवर्तत इत्यर्थेऽधिकारशब्दः प्रयुज्यते।

व्याकरणशास्त्रेष्वधिकारस्य विशेषस्वरूपं निर्दिष्टमस्ति। यत्र कश्चन सूत्रस्य वा सूत्रैकदेशस्य वा प्रभावः परवाक्येष्वपि प्रवर्तते, तत्र तस्य प्रभावस्य व्यापकत्वं दृश्यते। यत्र तु केवलं सूत्रैकदेश एवाधिकारत्वेन प्रवर्तते, तत्र तस्य वाक्यार्थबोधजनकत्वं सुलभं भवति। कदाचित्कस्मिंश्चिदधिकारस्य समापनात्पूर्वमेवान्योऽधिकार आरभ्यते, येन पूर्वोऽधिकारः निरर्थकप्रायो भवति। यथा कोऽप्यधिकार्येकस्मिन् पदे नियुक्तः सन् स्थानान्तरं प्राप्नोति, तस्य स्थानं पूर्वमेवान्येनाधिकारिणा गृह्यते, एवं पाणिनिनाऽपि कृतमस्तीति मन्यते। किन्तु पूर्वोऽधिकारः केवलं परं सूत्रं यावद् न गच्छति, अपितु क्वचिद्दूरं यावदपि प्रवर्तते। अधिकारसूत्रस्य लक्षणं भवति– उत्तरोत्तरगमनम्। अधिकरोतीत्यधिकारः। अधिकरणमधिक्रियतेऽनेनेति वाऽधिकारः। तत्र वक्ष्यमाणार्थसङ्क्षेपाय कार्यिकार्यनिमित्तानां यदुदीरणं सोऽधिकारः। अधिकरोतीत्यनेन पाणिनीयसूत्रसम्बन्धे केनाऽपि सूत्रेण विहितं कार्यं किं सूत्रं यावत् प्रचलतीति विवेचनसम्बद्धं सन्दर्भं स्मारयति। वैयाकरणा अधिकारस्य चतुर्विधस्वरूपं वर्णयन्ति– गोयूथः, सिंहदृष्टिः, मण्डुकप्लुतिः, गङ्गास्रोतःप्रवाहश्चेति। कस्यचिच्छब्दस्य कतिपयसूत्रपर्यन्तमनुवृत्तिर्गोयूथः। सिंहदृष्टिवदग्रे पठितस्य सूत्रस्य कतिपयशब्दानां पृष्ठतोऽनुवृत्तिः सिंहावलोकिताख्या, तदपेक्षयाऽधिकसङ्ख्यकसूत्रानुवृत्तिर्गङ्गास्रोतशशब्दवाच्या। आकाङ्क्षावशात् क्वचिदक्रमेण मण्डूकानामुत्प्लवनमिव केषाञ्चिच्छब्दानामनुवृत्तिर्मण्डूकप्लुतिरित्यभिधीयते। अधिकारसूत्रस्वरूपविवेचनम् इति शीर्षकान्वितस्यास्यानुसन्धाने को नामाधिकारः, स्वरितेनाधिकारसूत्रस्याशयः, किं नामस्वरितम्, अधिकारसूत्रलक्षणम्, व्याकरणशास्त्रेऽनुवृत्तिव्यवस्था, अधिकारस्यानुवृत्तिः, अधिकारसूत्रस्य प्रयोजनमित्यादयो विषया यथासम्भवं सुस्पष्टीकृताः सन्ति। अध्ययनमिदं पाणिनीयव्याकरणमध्येतृवर्गाणामधिकारसूत्रस्य स्वरूपविषये समुत्सुकानां छात्राणाञ्चोपयोगि भवितुं शक्नोतीति विज्ञापयित्वाऽत्रैव विरमामि। कृतेऽपि श्रमे भ्रमात् प्रमादादज्ञानाद्वा लेखेऽस्मिन् यास्त्रुटयः स्युस्तासां कृते क्षन्तव्योऽयमल्पज्ञो गुणग्राहिभिः सुधीभिः। इति शम्।


## कृतज्ञताज्ञापनम्

प्रस्तुतलेखस्य विरचनक्रमे येषां मुनीनां, वैयाकरणानां, भाषावैज्ञानिकानाञ्च विदुषां ग्रन्थाः, विचाराः, मार्गदर्शनानि च मया समुपजीव्य समालोकितानि, तेभ्यः सर्वेभ्यः विद्वद्भ्योऽहं सादरं हार्दिकीं कृतज्ञतां निवेदयामि। तथैव 'पाणिनीयाष्टाध्यायीस्थाधिकारसूत्राणां प्रयोजनम्' इति शीर्षकस्य लघ्वनुसन्धानप्रस्तावस्य स्वीकृतिपूर्वकमनुसन्धानार्थं SRDIG-80/81-H&S-04 इति अनुसन्धानवृत्तिं प्रदाय शोधकार्यस्य सफलसम्पादनाय महतीं वित्तीयसहायतां प्रदत्तवते नेपालस्थिताय विश्वविद्यालयानुदानाऽऽयोगाय अहं हार्दिकं साधुवादमर्पयामि। अपि च, अस्यानुसन्धानकार्यस्य सम्पादने प्रत्यक्षपरोक्षरूपेण यैरहमनुगृहीतः, तेभ्यः विशेषज्ञेभ्यः, पूज्यगुरुभ्यः, ग्रन्थप्रकाशकेभ्यः, मित्रेभ्यः सहयोगिभ्यश्चाहं सविनयं हार्दिकीं कृतज्ञतां प्रकटयामि।


## सन्दर्भसामग्रीसूची


*ऋग्वेदप्रातिशाख्यम्* (सन् १९७०), शौनकविरचितम्; उव्वटभाष्यसंवलितम्; वीरेन्द्रकुमारवर्मा, अनुवादक एवं परिष्कारकर्ता, दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान।

*कविकल्पद्रुमः* (संवत् १९०५), वोपदेवगोस्वामिविरचितः; परिभाषाटीकासमेतः; मदनमोहनदर्शनालङ्कारः, (सम्पा.), कलिकता।

*तन्त्रवार्तिकम्* (सन् १९०३), मीमांसासूत्रीयशाबरभाष्यटीका; भट्टश्रीकुमारिलस्वामिविरचिता; गङ्गाधरशास्त्री (सम्पा.), वनारस संस्कृत सिरिज, वाराणसी : विद्या विलास प्रेस।

द्विवेदी, जानकीप्रसादः (वि.सं. २०३२), *कातन्त्रव्याकरणविमर्शः*, वाराणसी : सम्पूर्णानन्द संस्कृत विश्वविद्यालय।

नागेशभट्टः (सन् १९८७), *परिभाषेन्दुशेखरः* (सर्वमङ्गलाख्यव्याख्यासहितः), वाराणसी : सम्पूर्णानन्द संस्कृत विश्वविद्यालय।

———— (वि.सं.२०७६), *परिभाषेन्दुशेखरः*, बोधप्रकाशिकासमन्वितः; केशवशरणोपाध्यायः (टीकाकारः), दिल्ली : श्रीमुकेशशर्मा एवं श्रीमती डा. सुमित्रा।

पतञ्जलिः (सन् १९९९), *व्याकरणमहाभाष्यम्,* कैयटप्रणीतभाष्यप्रदीप, नागेशकृतभाष्योद्द्योत तथा भट्टोजिदीक्षितविरचितशब्दकौस्तुभसहितम्; गुरुप्रसादशास्त्री, संस्कर्ता; नन्दकिशोरशास्त्री (सम्पा.), वाराणसी : प्रतिभा प्रकाशनम्।

———— (सन् २००३), *व्याकरणमहाभाष्यम्: नवाह्निकम्*, मधुसुदनप्रसादमिश्रः (सम्पा.); पुनर्मुद्रित संस्करण, वाराणसी : चौखम्बा विद्या भवन।

पाणिनिः (सन् १९८७), *अष्टाध्यायी,* पदच्छेद–वृत्ति–वार्तिक–टिप्पणीसहिता; गोपालशास्त्री दर्शनकेशरी, परिष्कर्ता; गोपालदत्तपाण्डेयः (सम्पा.); तृतीय संस्करण, वाराणसी : चौखम्बा सुरभारती प्रकाशन।

*पाराशरोपपुराणम्* (वि.सं. २०४६), कपिलदेवत्रिपाठी (सम्पा.), वाराणसी : सम्पूर्णानन्द संस्कृत विश्वविद्यालय।

भट्टोजिदीक्षितः (सन् १९६६), *सिद्धान्तकौमुदी*, लक्ष्मीटीकासहिता; सभापतिशर्मा (व्याख्या.); द्वितीयांशः; बालकृष्णशर्मा, (सम्पा.), दिल्ली : मोतीलाल बनारसीदास।

———— (सन् १९९१), *शब्दकौस्तुभः*, प्रथमो भागः; विन्ध्येश्वरीप्रसाद द्विवेदी एवं गणपतिशास्त्री मोकाटे, (सम्पा.); द्वितीय संस्करण, वाराणसी : चौखम्बा संस्कृत सिरिज अफिस।

———— (सन् १९९९), *सिद्धान्तकौमुदी*, बालमनोरमाटीकासहिता; गोपालदत्तपाण्डेयः (सम्पा.), वाराणसी : चौखम्बा सुरभारती प्रकाशन।

———— (सन् २००९), *सिद्धान्तकौमुदी*, तत्त्वबोधिनीव्याख्यासंवलिता; वासुदेवशर्मा (व्याख्या.), नयाँदिल्ली : लालबहादुरशास्त्री राष्ट्रियसंस्कृतविद्यापीठम्।

———— (वि.सं. २०६८), *प्रौढमनोरमा*, तृतीय संस्करण; गोपालशास्त्री नेने (सम्पा.), वाराणसी : चौखम्बा संस्कृत भवन।

मीमांसकः, युधिष्ठिरः (वि.सं. २०४१), *संस्कृत व्याकरणशास्त्र का इतिहास*, शान्तिस्वरूप कपूर, हरयाणा : रामलाल कपूर ट्रस्ट प्रेस।

सुश्रुतः (सन् २००१), *सुश्रुतसंहिता*, आयुर्वेदतत्त्वसन्दीपिका हिन्दीव्याख्यासहिता; वैज्ञानिकविमर्शटिप्पणिसहिता; अम्बिकादत्तशास्त्री (व्याख्याकारः), वाराणसी : चौखम्बा संस्कृत सिरिज अफिस।